# ॥ नवग्रहस्तोत्रम् ॥

अस्य श्रीनवग्रहस्तोत्रमन्त्रस्य वेदव्यासऋषिः । अनुष्टुप् छन्दः । मम
ग्रहानुकूल्यार्थे नवग्रहस्तोत्रजपे विनियोगः ॥

## सूर्यः

जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् ।
तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥ १ ॥

## चन्द्रः

दधिशङ्खतुषाराभं क्षीरोदार्णवसन्निभम् ।
नमामि शशिनं देवं शम्भोर्मुकुटभूषणम् ॥ २ ॥

## कुजः

धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम् ।
कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम् ॥ ३ ॥

## बुधः

प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् ।
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ॥ ४ ॥

## गुरुः

देवानां च ऋषीणां च गुरुं काञ्चनसन्निभम् ।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥ ५ ॥

## शुक्रः

हिमकुन्दसमाभासं दैत्यानां परमं गुरुम् ।
सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥ ६ ॥

## शनिः

नीलाञ्जनसमाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तण्डसम्भूतं तं नमामि शनैश्चरम् ॥ ७ ॥

## राहुः

अर्धकायं महावीरं चन्द्रादित्यविमर्दनम् ।
सिंहिकागर्भसम्भूतं तं राहुं प्रणमाम्यहम् ॥ ८ ॥

## केतुः

पलाशपुष्पसङ्काशं तारकाग्रहमस्तकम् ।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥ ९ ॥

इदं व्यासमुखोत्पन्नं पठिष्यन्ति समाहिताः ।
दिवा वा यदि वा रात्रौ तेषां शान्तिर्भविष्यति ॥ १० ॥

ऐश्वर्यमतुलं तेषामारोग्यं पुष्टिवर्धनम् ।
नरनारीनृपाणां च भवेद्दुःस्वप्ननाशनम् ॥ ११ ॥

ग्रहनक्षत्रपीडाश्च तस्कराग्निसमुद्भवाः ।
सर्वाश्चास्य विनश्यन्ति व्यासप्रोक्तान्न संशयः ॥ १२ ॥
॥ इति श्रीव्यासविरचितं नवग्रहस्तोत्रम् ॥